
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय रामटेक

हस्तलिखित संग्रह

दाखल.क्र. M-3004 विषय साहित्य

नाव किरातार्जुनियेकाव्य

लेखक/लिपीकार

पृष्ठ. 42 काळ पुर्ण/ अपुर्ण

अथकिरातार्जुनीयेकाव्येप्रथमःसर्गः

श्रीगणेशायनमः अर्द्धांगीकृतदांपत्यमपिगाढानुरागियत् पितृभ्यांजगतस्तस्मैकस्मैचिन्महसेनमः १ आलंबेजगदालंबेहेरंबच
रणांबुजे शुष्यंतियद्रजःस्पर्शात्सद्यःप्रत्यूहवार्द्धयः २ तद्दिव्यमव्ययंधामसारस्वतमुपास्महे यत्प्रकाशात्प्रलीयंतेमोहांधत-॥
मसश्छटाः ३ वाणींकाणभुजीमजीगणदवाशासीच्चवैयासकीमंतस्तंत्रमरंस्तपन्नगगवीगुंफेषुचाजागरीत् वाचामाकलयद्रहस्यम
खिलंयश्चाक्षपादस्फुरांलोकेभूद्यदुपज्ञमेवविदुषांसौजन्यजन्यंयशः ४ मल्लिनाथकविःसोयंमंदात्मानुजिघृक्षया तत्किरातार्जुनी-
याख्यंकाव्यंव्याख्यातुमिच्छति ५ नारिकेलफलसंमितंवचोभारवेःसपदितद्विभज्यते स्वादयंतुरसगर्भनिर्भरंसारमस्यरसिकायथे-
प्सितं ६ नानानिबंधविषमैकपदैर्नितांतंसाशंकसंक्रमणखिन्नधियामशंकं कर्तुंप्रवेशमिहभारविकाव्यबंधेघंटापथंकमपिनूत
नमातनिष्ये ७ इहान्वयमुखेनैवसर्वंव्याख्यायतेमया नामूलंलिख्यतेकिंचिन्नानपेक्षितमुच्यते ८ अथतत्रभवान्भारविनामाकवि
काव्यंयशसेर्थकृतेव्यवहारविदेशिवेतरक्षतये सद्यःपरनिर्वृतयेकांतासंमिततयोपदेशयुजे इत्याद्यालंकारिकवचनप्रामाण्यात्काव्यस्य
कीर्त्याद्यनेकश्रेयःसाधनतांकाव्यालापांश्चवर्जयेदितिनिषेधशास्त्रस्यासत्काव्यविषयतांचपश्यन् किरातार्जुनीयाख्यंकाव्यंचिकीर्षुश्चिकी

र्थिनार्थाविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनत्वादाशीर्नमस्क्रियावस्तुनिर्देशोवापिनन्मुखमित्याशीर्वादाद्यन्यतमस्यप्रबंधमुख
लक्षणत्वाद्बवनेचरस्ययुधिष्ठिरप्राप्तिरूपंवस्तुनिर्दिशन्कथामुपक्षिपति श्रियइति आदितःश्रीशब्दस्यप्रयोगाद्वर्णगणादिदोषशुद्धि
र्नातीचात्रोपयुज्यते तदुक्तं देवतावाचकाःशब्दायेचभद्रादिवाचकाः तेसर्वेनैवनिंद्यास्युर्लिपितोगणतोपिचेति कुरूणांनिवासाःकुर

श्रियःकुरूणामधिपस्यपालनींप्रजासुवृत्तिंयमयुंक्तवेदितुं
सवर्णिलिंगीविदितःसमाययौयुधिष्ठिरंद्वैतवनेवनेचरः १

वोजनपदाः तस्यनिवास इत्यण्प्रत्ययः जनपदेलुक् तेषामधिपस्यदुर्योधनस्यसंबंधिनीं शेषेषष्ठी श्रियःराजलक्ष्म्याः कर्तृकर्मणोःकृतीति
कर्मणिषष्ठी पाल्यतेऽनयेतिपालनीतांप्रतिष्ठापिकामित्यर्थः प्रजानुरागमूलत्वात्संपदइतिभावः करणेल्युट् टिड्ढाणञित्यादिनाङीप् प्र
जासुजनेषुविषये प्रजास्यात्संततौजनइत्यमरः वृत्तिंव्यवहारंवेदितुंज्ञातुं यंवनेचरंनिषादमयुंक्त नियुक्तवान् वर्णःप्रशस्तिरस्यास्तीतिव

र्णी ब्रह्मचारी वर्णाद्ब्रह्मचारिणीतीनिप्रत्ययः तस्यलिंगंचिह्नमस्यास्तीतिवर्णिलिंगीब्रह्मचारिवेषधारी तदुक्तं स्मरणंकीर्तनंकेलिःप्रेक्षणंगुह्य
भाषणं संकल्पोध्यवसायश्चक्रियानिष्पत्तिरेवच एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणः विपरीतंब्रह्मचर्यमेतदेवाष्टलक्षणं एतदष्टविधमैथुनाभा
वः प्रशस्तिरित्यर्थः वनेचरतीतिवनेचरः किरातः भिल्लः किरातःशबरःपुलिंदाम्लेच्छजातयइत्यमरः चरेष्टइतिटप्रत्ययः तत्पुरुषेकृतिबहु
लमित्यलुक् विदितंवेदनमस्यास्तीतिविदितः परराष्ट्रवृत्तांतज्ञानवानित्यर्थः अर्शआदित्वादच्प्रत्ययः अथवाकर्तरिकर्मधर्मोप
चारात् विदितपरवृत्तांतोविदितइत्युच्यते उभयत्रापि पीतागावोभुक्ताब्राह्मणा विभक्ताभ्रातरइत्यादिवत्साधुत्वं नतुकर्तरिक्तः
सकर्मकेभ्यस्तस्यविधानाभावात् अतएवभाष्यकारेणाकारोमत्वर्थीयउक्तः विभक्तमेषामस्तीतिविभक्ताः पीतमेषामस्तीतिपीताइ
ति अथवोत्तरपदलोपोद्रष्टव्यः विभक्तधनाः विभक्ताःपीतोदकाःपीताइति अत्र लोपशब्दार्थमाहकैयटः गम्यमानार्थस्याप्रयोगएवलो
पोभिमतः विभक्ताभ्रातरइत्यत्रचधनस्ययद्विभक्तत्वंतद्भ्रातृषूपचरितं पीतोदकागावइत्यत्राप्युदकपीतत्वंगोष्वारोप्यतइति तद्वदत्रापि
वृत्तिगतंविदितत्वंवेत्तरिवनेचरउपचर्यते एतेनवनायपीतप्रतिबद्धवत्सांपातुंनप्रथमंव्यवस्यतिजलंयुष्मास्वपीतेषु इत्येवमादयोव्याख्याताः २

अथवाविदितोविदितवान् सकर्मकादप्यविवक्षिते कर्मणि कर्तरिक्तः यथा आदर्शिताकर्तेत्यादौ यथाहुः धातोरर्थांतरेवृत्तेर्धात्वर्थेनोपसंग्रहा
न् प्रसिद्धेरविवक्षातः कर्मिणोकर्मिकाक्रियेति द्वैतवनेद्वैताख्येतपोवने यद्वाद्वेक्षुत्पिपासेद्वैतेगतेयस्मात्तद्वीतं तच्चतद्वनंचतस्मिन् शोकमो
हादिवर्जितमित्यर्थः युधिरणेस्थिरंयुधिष्ठिरं धर्मराजं हलदंतात्सप्तम्याः संज्ञायामित्यलुक् गवियुधिभ्यांस्थिरइतिषत्वं समाययौसंप्राप्तः

कृतप्रणामस्यमहीं महीभुजे जितांसपत्नेननिवेदयिष्यतः
नविव्यथेतस्यमनोनहिप्रियं प्रवक्तुमिच्छंतिमृषाहितैषिणः २

अत्रवनेवनेचरइतिद्वयोः स्वरव्यंजनसमुदाययोरैक्यादेवहत्त्यनुप्रासोनामालंकारः अस्मिन्सर्गेवंशस्थंवृत्तं तल्लक्षणंतु जतौतुवंशस्थ
मुदीरितंजराविति १ संप्रतिवनेचरस्यतत्कालोचित्यमादर्शयन् तस्यतद्गुणसंपन्नत्वमाह कृतेति कृतप्रणामस्यतत्कालोचितत्वात्
कृतनमस्कारस्यसपत्नेनरिपुणा रिपुवैरिसपत्नारिद्विषद्वेषणदुर्हृदइत्यमरः जितांस्वीयत्त्वीकृतांमहीं महीभुजेयुधिष्ठिराय क्रियाग्रहणा

३ स्संप्रदानत्वं निवेदयिष्यतो विज्ञापयिष्यतः लृटःसद्वेतिसत्प्रत्ययः तस्यवनेचरस्यमनोनविव्यथे कथमीदृगप्रियंराज्ञेविज्ञापयामीतिमनसिनच

चालेत्यर्थः व्यथभयसंचलनयोरितिधातोर्लिट् उक्तमर्थमर्थां तरोपन्यासेनदृढयति नहीति हियस्माद्धितमिच्छंतीतिहितैषणःस्वामिहिता

र्थिनःपुरुषाःमृषा मिथ्याभूतंप्रियंवक्तुंनेच्छंति अन्यथाकार्यविघातकतयास्वामिद्रोहिणःस्युरितिभावः अमौढ्यममांद्यममृषाभा

द्विषांविघातायविधातुमिच्छतोरहस्यनुज्ञामधिगम्यभूभृतः
ससौष्ठवौदार्यविशेषशालिनींविनिश्चितार्थामितिवाचमाददे २

षित्वमभ्यूहकत्वंचेतिचारगुणाइतिनीतिवाक्यामृते २ तथापिप्रियार्हेराज्ञिकटुनिष्ठुरोक्तिर्नयुक्तेत्याशंक्यस्वाम्यनुज्ञयानदुष्यतीत्याश

येनाह द्विषामिति रहस्येकांतेसवनेचरःद्विषांशत्रूणांकर्मणिषष्ठी विघातायविहंतुमित्यर्थः तुमर्थाच्चभाववचनादितिचतुर्थी भाववच

नाच्चेतितुमुनर्थेघञ्प्रत्ययः अत्रतादर्थ्यमपिनदोषः तथापिप्रयोगवैचित्र्यविशेषस्याप्यलंकारत्वादेवंव्याचक्षते विधातुंव्यापारंकर्तुमि ३

क्तः समानकर्तृकेषुतुमुन् द्विषोविहंतुमुद्युक्तस्येत्यर्थः अतएवभूभृतोयुधिष्ठिरस्यानुज्ञामधिगम्य सुष्ठुभावःसौष्ठवंशब्दसामर्थ्यं सुष्ठु
शब्दादव्ययादुद्गात्रादित्वादञ्प्रत्ययः उदारस्यभावःऔदार्यं अर्थसंपत्तिः तयोर्द्वंद्वः सौष्ठवौदार्ये अत्रौदार्यशब्दस्याजाद्यदंतत्वेपिल
क्षणहेत्वोः क्रियाया इत्यत्राल्पान्कस्यापिहेतुशब्दस्यपूर्वनिपातमकुर्वतासूत्रकृतैवपूर्वनिपातस्यानित्यत्वज्ञापनान्नपूर्वनिपातः उक्तं
चकाशिकायां अयमेवलक्षणहेत्वोरितिनिर्देशः पूर्वनिपातव्यभिचारचिह्नमिति तेएवविशेषः तयोर्वाविशेषः तेनशालतेशोभ
तइतिसौष्ठवौदार्यविशेषशालिनीतां ताच्छील्येणिनिः विनिश्चितार्थांविशेषतःप्रमाणतोनिर्णीतार्थां इतिवक्ष्यमाणरूपां वाचमाददे
स्वीकृतवान् उवाचेत्यर्थः २

प्रथमं तावदप्रियनिवेदकमात्मानं प्रत्यक्षोभं याचते क्रियास्विति हे नृप क्रियासु कृत्यवस्तुषु युक्तैर्नियुक्तैरनुजीविभिः भृत्यैः चारादिभिरित्यर्थः चरंतीति चराः त एव चाराः पचाद्यजंताःप्रज्ञादित्वादण्प्रत्ययः त एव चक्षूंषि येषां ते चारचक्षुषः स्वपरमंडले कार्याकार्यावलोकने चाराश्च क्षूंषि क्षितिपालानामिति नीतिवाक्यामृते तदुक्तं चारैः पश्यंति राजानो वेदैः पश्यंति वाडवाः गंधेन गावः पश्यंति चक्षुर्भ्यामितरे जना इति प्रभ

क्रियासु युक्तैर्नृप चारचक्षुषो न वंचनीयाः प्रभवोऽनुजीविभिः
अतोऽर्हसि क्षंतुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ४

वो निग्रहानुग्रहसमर्थाः स्वामिनो न वंचनीयाः न प्रतारणीयाः सत्यमेव वक्तव्या इत्यर्थः चारापचारे चक्षुरपचारवद्राज्ञां पदे पदे निपात इति भावः अतोऽप्रतार्यत्वाद्धेतोः असाधु अप्रियं साधु प्रियं वा मदुक्तमिति शेषः क्षंतुं सोढुमर्हसि अत्र द्वितीयार्थो लक्ष्यते मदुक्तमसाधु साधु वा साध्विव वाशब्द इवार्थे इवार्थे च विकल्पे स्यादिति वास्याद्विकल्पोपमयोरेवार्थेपि समुच्चय इति विश्वः मदुक्तमसाध्वपि साध्विव श्रो॰

तुमर्हसीत्यर्थः कुतः हितंपथ्यंमनोहारिप्रियंचवचोदुर्लभं अतोमद्वचोहितत्वादप्रियमपिक्षंतव्यमित्यर्थः ४ तर्हितूष्णींभावएववरमित्या
शंक्याह सइति यःअमात्यादिःसखाअधिपंस्वामिनंसाधुहितंनशास्तिनोपदिशति त्रिब्रूशास्वित्यादिनाशासेर्दुहादिपाठात्द्विकर्मक
त्वं सहितानुपदेष्टाकुत्सितःसखाकिंसखा दुर्मंत्रीत्यर्थः किमःक्षेपइतिसमासांतप्रतिषेधः तथायःप्रभुःनिग्रहानुग्रहसमर्थःस्वामी हि

सकिंसखासाधुनशास्तियोऽधिपंहितान्नयःसंशृणुतेसकिंप्रभुः

तादात्मज्ञनात् आख्यातोपयोगइत्यपादानत्वात्पंचमी नसंशृणुतेनशृणोति समोगम्यृच्छीत्यादिनासंपूर्वाच्छृणोतेरकर्मकादात्मनेपदं अक
र्मकत्वंचविवक्षितं सहितमश्रोताप्रभुःकिंप्रभुःकुत्सितःस्वामी पूर्ववत्समासः सर्वथासचिवेनवक्तव्यंस्वामिनाश्रोतव्यं एवंचराजमंत्रिणोरे-
कमत्यंस्यादित्यर्थः ७ ७ ७

ऐकमत्यस्य फलमाह सदेति हि यस्मान्नृपेषु स्वामिषु अमासहभवाः अमात्याः तेषु च अव्ययात्सप् अनुकूलेषु परस्परानुरक्तेषु सत्सु सर्वसंपदः सदा रतिमनुरागं कुर्वते कुर्वंति न जातु जहतीत्यर्थः अतो मया वक्तव्यं त्वया श्रोतव्यमिति भावः अत्रैव राजमंत्रिणोर्हितानुपदेशात् दश्रवणनिंदासामर्थ्यसिद्धेरैकमत्यलक्षणकारणस्य निर्दिष्टस्य सर्वसंपत्सिद्धिरूपकार्येण समर्थनात्कार्येणं कारणसमर्थनरूपो-

सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः ५ निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जंतवः तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषां ६

र्थांतरन्यासः तदुक्तं सामान्यविशेषकार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थांतरन्यास इति ५ संप्रति स्वाहंकारं परिहरति नि
सर्गेति निसर्गदुर्बोधं स्वभावदुर्ग्रहं ईषद्दुरित्यादिना खल्प्रत्ययः भूपतीनां चरितं क्व अबोधविक्लवाः अज्ञानोपहता जंतवो मादृशाः पा ५

मरजनाइत्यर्थः क्नोभयमेकत्रसंघटनइत्यर्थः तथापिनिगूढतत्वंसंवृतयाथार्थ्यविद्विषांनयवर्त्मषाड्गुण्यप्रयोगोमयाअवेदिज्ञा
तमितिनियत्‌ विदेःकर्मणिलुङ् संधिविग्रहयानानिसंस्थाप्यासनमेवच द्वैधीभावश्चविज्ञेयाःषड्गुणानीतिवर्णने संधिर्मैत्रीकर
णं विग्रहःपरपीडनं यानंपरंप्रतिगमनं संस्थापरस्यदेहार्पणं आसनंउपेक्षणं एकेनसार्द्धंसंधाय अपरंप्रतियानंद्वैधीभावः अयंइदं
वेदनमित्यर्थः विधेयप्राधान्यात्पुल्लिंगनिर्देशः तवानुभावःसामर्थ्यं अनुगतोभावोऽनुभावइतिघञंतेनप्रादिसमासः ननूपसृष्टात्
घञ्प्रत्ययः श्रिणीभुवोनुपसर्गइत्यनुपसर्गाद्भवतेर्धातोर्घञ्विधानात्‌ अतएवकाशिकायांकथंप्रभावोराज्ञांप्रकृष्टोभावइतिप्रादि
समासइतिदोषपरिहारौ सम्यक्ज्ञात्वैवविज्ञापयामिननुवृथाकर्णकठोरंप्रलपामीत्याशयः ६

संप्रतियद्वक्तव्यंतदाह विशंकमानइति सुखेनयुध्यतइतिसुयोधनः भाषायांशासियुधिदृशिधृषिमृषिभ्योयुच् नृपासनस्थः सिंहा
सनस्थोपिवनमधिवसतीतिवनाधिवासिनोवनस्थात् राज्यभ्रष्टादित्यर्थः भवतस्त्वत्तःपराभवंपराजयंविशंकमानःउत्प्रेक्षमाणः सन् दु
ष्टमुदरंयस्येतिदुरोदरंद्यूतं पृषोदरादित्वात्साधुः दुरोदरोद्यूतकारेपणेद्यूतेदुरोदरमित्यमरः तस्यछद्मनामिषेणजितांलब्धां दुर्नयार्जितामि

विशंकमानोभवतःपराभवंनृपासनस्थोपिवनाधिवासिनः
दुरोदरछद्मजितांसमीहतेनयेनजेतुंजगतींसुयोधनः ७

त्यर्थः जगतींमहीं जगतीविष्टपेमर्त्यांवास्तुछंदोविशेषयोरितिवैजयंती नयेननीत्याजेतुंवशीकर्तुंसमीहतेव्याप्रियते नतूदास्तइत्यर्थः ब
लवत्स्वामिकमविशुद्धागमंचधनंभुंजानस्यकुतोमनसःसमाधिरितिभावः अत्र दुरोदरछद्मजितामितिविशेषणद्वारेणपदार्थस्यचतुर्थप
दार्थप्रतिहेतुत्वेनोपन्यासात् द्वितीयकाव्यलिंगमलंकारः तदुक्तं हेतोर्वाक्यपदार्थत्वेकाव्यलिंगमुदाहृतमिति ७ ७

नयेनजेतुंजगतींसमीहतइत्युक्तंतत्प्रकारमाह तथेति तथापिसाशंकोपिजिह्मोवक्रोवंचकइतियावत् सदुर्योधनः भवज्जिगीषयागुणै
र्भवंतमाक्रमितुमिच्छयेत्यर्थः हेताविति तृतीया गुणसंपदादानदाक्षिण्यादिगुणगरिम्णाकरणेनशुभ्रंयशस्तनोति सखलोपिगुणलोभनीयां
त्वत्संपदमात्मसात्कर्तुंत्वत्तोपिगुणवत्तामात्मनः प्रकटयतीत्यर्थः नन्वेवंगुणिनः सतोपिसज्जनविरोधोमहांस्तस्यदोषइत्याशंक्यसो

तथापिजिह्मःसभवज्जिगीषयातनोतिशुभ्रंगुणसंपदायशः
समुन्नयन्भूतिमनार्यसंगमाद्वरंविरोधोऽपिसमंमहात्मभिः ८

पितत्संसर्गालाभेनीचसमागमाद्वासमुत्कर्षाद्वहत्वादित्याह समुन्नयन्निति तथाहि भूतिंसमुन्नयन्उत्कर्षमापादयन् लटः शतृशानचावि
त्यादिनाशतृप्रत्ययः पुनर्लट्ग्रहणसामर्थ्यात् प्रथमासामानाधिकरण्येपि महात्मभिःसमंसहेत्यर्थः साकंसार्द्धंसमंसहेत्यमरः अनार्य
संगमात्दुर्जनसंगमात् पंचमीविभक्तइतिपंचमी विरोधोपिवरंमनाक्प्रियं देवाद्दतेवरःश्रेष्ठेत्रिषुक्लीबेमनाक्प्रियइत्यमरः अत्रमैत्र्यपेक्ष

यामनाक्प्रियत्वं विरोधस्य भूतिंसमुन्नयन्नित्यस्य पूर्ववाक्यान्वये समाप्तस्य वाक्यार्थस्य पुनरादानात्समाप्तपुनरादानदोषापत्तिः तदु
क्तं काव्यप्रकाशे समाप्तपुनरादानात्समाप्तपुनरात्तकमिति नचवाक्यांतरमेतत् येनोक्तदोषपरिहारः स्यात् अर्थांतरन्यासोलंकारः सच
भूतिसमुन्नयस्य पदार्थविशेषणद्वाराविरोधवत्त्वंप्रतिहेतुत्वाभिधानरूपकाव्यलिंगानुप्राणितइति ८ ननुकातर्यंकेवलानीतिरित्याशं-

कृतारिषड्वर्गजयेनमानवीमगम्यरूपांपदवींप्रपित्सुना

क्यनीतियुक्तंपौरुषमस्येत्याह कृतारिषड्वर्गजयेनेति षण्णांवर्गःषड्वर्गःअरीणामंतःशत्रूणांकामक्रोधादीनांषड्वर्गोरिषड्वर्गः शिवभाग
वनवत्समासः तस्यजयःकृतो येनतेनतथोक्तेन विनीतेनेत्यर्थः विनीताधिकारंप्रजापालनमितिभावः अगम्यरूपांदुराकलनीयां मनोरियंमान
वीतां मनूपदिष्टसदाचारक्षुण्णां पदवींप्रजापालनपद्धतिं प्रपित्सुनाप्रतिपत्तुमिच्छुना प्रपद्यतेःसन्नंतादुप्रत्ययः सनिमीमेत्यादिनाद्दसादे

द्राः अत्रन्लोपोभ्यासस्येत्यभ्यासलोपः अस्तातंद्रिरालस्यंयस्यतेनास्ततंद्रिणा अनलसेनेत्यर्थः तंद्रिःसौत्रोधातुस्तस्माज्जनयादयश्चेत्यौणा-
दिकइकारप्रत्ययः कृदिकारादक्तिनोवाङीष्वक्तव्यइतिघटीनिद्रीतंद्रीतिङीषंतोऽपीति क्षीरस्वामी निद्रातंद्रेत्याबंतोपि तथाचरामायणे
प्रयोगः सनिस्तंद्रिरमत्तश्चस्वदोषपरदोषविदिति नेनदुर्योधनेन पुरुषस्यकर्मपौरुषंपुरुषाकारउद्योगइतियावत् युवादित्वादण्प्रत्य

विभज्यनक्तंदिवमस्ततंद्रिणावितन्यतेतेननयेनपौरुषं ९

यः पौरुषंपुरुषस्योन्के भावेकर्मणितेजसीतिविश्वः नक्तंनदिवाचनक्तंदिवं अहोरात्रयोरित्यर्थः अचतुरेत्यादिनासप्तम्यर्थद्वन्द्वयोरव्ययंया
ईइनिपातः समासांतः विभज्य अस्यांवेलायामिदंकर्मेति विभागंकृत्वा नयेननीत्या वितन्यते विस्तार्यते ९

संप्रतिभृत्याद्यनुरागमाह सखीनिति गतस्मयोनिरहंकारः स्मयोगर्वेद्भुतेयोगेकातर्येगायकेपिन्चेतिविश्वः अतएवसदुर्योधनः संततंनि
रंतरंसाधुसम्यगकपटमित्यर्थः अनुजीविनोभृत्यान् प्रीतियुजःस्निग्धान् सखीन्मित्राणीवदर्शयते लोकस्येतिशेषः हेतुमतिन्चेतिणिच् णिच
श्चेत्यात्मनेपदं शोभनंहृदयंयेषांतान्सुहृदोमित्राणि सुहृद्दुर्हृदौमित्रामित्रयोरितिनिपातः बंधुभिःभ्रात्रादिभिः समानमानान्तुल्यसत्कारा

सखीनिवप्रीतियुजोनुजीविनःसमानमानान्सुहृदश्चबंधुभिः

न्दर्शयते बंधूनांसमूहोबंधुतातां ग्रामजनबंधुसहायेभ्यइतितल् कृतमाधिपत्यंस्वाम्यंयस्यास्तां कृताधिपत्यामिवदर्शयते बंधूनधिपतीनि
वदर्शयतीत्यर्थः यथाभृत्यादिषुसख्यादिबुद्धिर्जायतेलोकस्यतथातान्संभावयतीत्यर्थः अनुजीव्यादीनांकर्तुरीप्सिततमंकर्मेतिक
र्मत्वं पूर्वत्रस्मिन्नेवपदान्वयेवाक्यार्थमित्थंवर्णयंति सराजानुजीव्यादीन्सख्यादीनिवदर्शयते सख्यादयइवतेतंपश्यंति सख्यादि

भावेनपश्यतस्तांस्तथादर्शयते स्वयमेवछंदानुवर्तितयास्वदर्शनंतेभ्यःप्रयछतीत्यर्थः अर्थात्तस्येप्सितकर्मत्वं अणिकर्त्तुरनुजीव्यादेरभिवादि
दृशोरात्मनेपदउपसंख्यानमितिपाक्षिकंकर्मत्वं एवंचात्राण्यंतस्यकर्मणोराज्ञोण्यंतेकर्तृत्वेप्यारोहयतेहस्तीस्वयमेवेत्यादिवदश्रूयमाणक
र्मांतरत्वाभावान्नायंणेरणाविितिसूत्रस्यविषयइतिमत्वाणिचश्चेत्येवात्मनेपदंप्रतिपेदिरे भाष्येतु णेरणाविितिसूत्रविषयत्वमप्यस्योक्तं यथा

ससंततंदर्शयतेगतस्मयः कृताधिपत्यामिवसाधुबंधुताम् १०

हृ पश्यंतिभृत्याराजानंदर्श
यतेभृत्यान्राजादर्शयतेभृत्यैराजेत्यात्मनेपदंसिद्धंभवतीति अत्रकैयटः नतुक र्मांतरसद्भावादत्रानेनात्मनेपदेनभाव्यं उच्यते अस्मादेवो
दाहरणाद्भाष्यकारस्यायमेवाभिप्रायऊह्यते अण्यंतावस्थायांयेकर्तृकर्मणीतद्व्यतिरिक्तकर्मांतरसद्भावेआत्मनेपदंनभवति यथास्थलमारो
हयतिमनुष्यानिति इहत्वण्यंताव स्थायांकर्तृणांभृत्यानांणौकर्मत्वमितिभवत्येवात्मनेपदमिति १० ६७

नचायंत्रिवर्गात्क्रमाद्यतीत्याह असक्तमिति यथायथंयथास्वं विभज्य असंकीर्णरूपंविविच्येत्यर्थः यथास्वेयथायथमितिनिपातेद्विर्भावोन पुंसकत्वंच ह्रस्वोनपुंसकेप्रातिपदिकस्येतिह्रस्वत्वं पक्षेपातःपक्षपातः आसक्तिविशेषः समस्तुल्योयस्यांतयासमपक्षपातया भक्त्याऽनुरागविशे षेण पूज्येष्वनुरागोभक्तिरित्युपदेशः पूज्यश्चायंत्रिवर्गः असक्तमनासक्तमव्यसनितयेतियावत् आराधयतःसेवमानस्य अस्यदुर्योधनस्य त्रया

असक्तमाराधयतोयथायथंविभज्यभक्त्यासमपक्षपातया गुणानुरागादिवसख्यमी
यिवान्नबाधतेऽस्यत्रिगणःपरस्परं ११

णां धर्मार्थकामानांगणस्त्रिगणः त्रिवर्गोधर्मकामार्थैश्चतुर्वर्गःसमोक्षकैरि त्यमरः गुणानुरागात्तदीयगुणेष्वनुरागात् गुणवदाश्रयलोभादित्यर्थः सख्यंमैत्रीं सख्युर्यइतियप्रत्ययः ईयिवानिवउपगतवानिवेत्युत्प्रेक्षा उपे यिवाननाश्वानन्नूचानश्चेतिक्वसुप्रत्ययांतोनिपातः नात्रोपसर्गस्तंत्रमिति काशिकाकारआह परस्परं नबाधतेसमवर्तित्वादस्यधर्मार्थकामाः परस्परानुपमर्देनवर्द्धतइत्यर्थः उक्तंच धर्मार्थकामाःसममेवसेव्यायोह्येकसक्तःसनरोजघन्यइति ११ ७

अथश्लोकत्रयेणोपायकौशल्यंदर्शयन्नादौसामदानेदर्शयति निरत्ययमिति तस्यदुर्योधनस्य निरत्ययंनिर्बाधकं अमायिकमित्यर्थः अन्य थोन्नतानांदुर्ग्रहत्वादितिभावः सामसांत्वं सामसांत्वमुभेसमेइत्यमरः सामप्रेमपरंवाक्यंदानंचार्थविसर्जनं भेदःपरजनाकृष्टिर्निग्र हःपरपीडनं दानवर्जितंनप्रवर्तते अन्यथालुब्धाद्यार्जवनस्यशुष्कप्रियैर्वचनैर्दुष्करत्वादितिभावः उक्तंच लुब्धमर्थेनगृह्णीयाद्स्तब्ध

निरत्ययंसामनदानवर्जितंनभूरिदानंविरहय्यसत्क्रियाम्
प्रवर्ततेतस्यविशेषशालिनीगुणानुरोधेनविनानसत्क्रिया १२

मंजलिकर्मणा मूर्खंछंदोनुरोधेनतत्त्वार्थेनचपंडितमिति तथाभूरिप्रभूतं नतुकदाचित्स्वल्पमित्यर्थः दानंधनत्यागः सदित्यादरार्थेव्ययं आदरानादरयोःसदसतीतिनिपातसंज्ञास्मरणात् तस्यक्रियातांसत्क्रियां विरहय्यविहाय ल्यपिलघुपूर्वादित्ययादेशः नप्रवर्तते अना दरेदानवैफल्यादितिभावः नचैवंसर्वत्रानेनाविवेकित्वंकोशहानिश्चस्यादित्याह विशेषशालिनी अतिशययोगिनीसत्क्रियागुणानुरो

 धेनगुणानुरागेणविनानप्रवर्त्तते पृथग्विनेत्यादिनातृतीया गुणेष्वेवादरोभूरिदानंचेतिनोक्तदोषावकाशइत्यर्थः अत्रोत्तरोत्तरस्यपूर्वपूर्व
विशेषणतयास्थापनादेकावल्यलंकारः तदुक्तंकाव्यप्रकाशे स्थाप्यतेपोह्यतेवापितथापूर्वपरंपरं विशेषणतयावस्तुयत्रसैकावलीद्विधे-
ति तथाचोदाहरणं नतज्जलंयन्नसुचारुपंकजंनपंकजंतद्यदलीनषट्पदं नषट्पदोसौकलगुंजितोनयोनगुंजितंतन्नजहारयन्मनइति
१२

वसूनिवांछन्नवशीनमन्युनास्वधर्मइत्येषनिवृत्तकारणः

अथदंडप्रकारमाह वसूनीति वशीजितेंद्रियः सदुर्योधनः वसूनिधनानि वसुतोयेधनेमणाविति वैजयंती वांछन्सन्लोभेनेत्यर्थः ननिहं-
तीतिशेषः तथामन्युनाकोपेननच मन्युर्दैन्येक्रतौक्रुधीत्यमरः धर्मशास्त्रानुसारेणक्रोधलोभविवर्जितइतिस्मरणादित्यर्थः किंतुनिवृत्तकार
णोनिवृत्तलोभादिनिमित्तःसन् स्वधर्मइत्येषस्तस्यराज्ञःसतोममायंधर्मोममेदंकर्तव्यमित्यस्मादेवहेतोरित्यर्थः अदंड्यान्दंडयन्राजादंड्यां
श्चैवाप्यदंडयन् अयशोमहदाप्नोतिनरकंचाधिगच्छतीतिमनुस्मरणादितिभावः छ छ

गुरूपदिष्टेनप्राड्विवाकोपदिष्टेन धर्मशास्त्रंपुरस्कृत्यप्राड्विवाकमतेस्थितः समाहितमतिःपश्येद्व्यवहाराननुक्रमादितिनारदस्मरणात् दं
डेनदमेनशिक्षयेत्यर्थः रिपौसुतेपिवास्थितमितिशेषः एतेनास्यसमदर्शित्वमुक्तं धर्मविप्लवंधर्मव्यतिक्रमंअधर्ममितियावत् निहंति
निवारयति दुष्टएवास्यशत्रुःशिष्टएवास्यबंधुः नतुसंबंधनिबंधनःपक्षपातोस्तीत्यर्थः १२ संप्रतिभेदकौशल्यंदर्शयति विधायेति

गुरूपदिष्टेनरिपौसुतेपिवानिहंतिदंडेनसधर्मविप्लवं १२
विधायरक्षान्परितःपरेतरानशंकिताकारमुपैतिशंकितः

शंकासंजातायस्यसशंकितोऽविश्वस्तःसन् परितोसर्वमंडले परेतरानात्मीयान् अवंचकानितियावत् यद्वापरानितरयंतिभेदेनात्मसा
त्कुर्वंतीतिपरेतरास्तान् तत्करोतीतिण्यंतात्कर्मण्यण्प्रत्ययः रक्षंतीतिरक्षास्तान् रक्षकान् मंत्रगुप्तिसमर्थानित्यर्थः नंदिग्रहीत्यादिनाप्
त्राद्यच् विधायकृत्वा नियुज्येत्यर्थः अशंकितस्याकारमुपैति स्वयमविश्वस्तोपिविश्वस्तवदेवव्यवहरन्परमुखेनैवपरान्भिनत्तीत्यर्थः

नन्वतानूरक्षानुपेक्षतेयेनतेविकुर्वीरन्नित्याह क्रियेति क्रियापवर्गेषु कर्मसमाप्तिषु अनुजीविसात्कृताः भृत्याधीनाः कृताः अपुनरादत्तित याद्त्ताइत्यर्थः देयेत्रान्वेतिसातिप्रत्ययः संपदोस्यराज्ञः कृतज्ञतांउपकारज्ञत्वंवदंति प्रीतिज्ञानैरेवास्यकृतज्ञत्वंप्रकाश्यतेनतुवाङ्मात्रेणे त्यर्थः कृतज्ञेराजन्यनुजीविनोऽनुरज्यंते अनुरक्ताश्चतंरक्षंतीतिभावः १४ अथोपायप्रयोगस्यफलवत्तांदर्शयति अनारतमिति ते

क्रियापवर्गेष्वनुजीविसात्कृताःकृतज्ञतामस्यवदंतिसंपदः १४ अनारतंतेनपदेषुलंभिताविभज्यसम्यग्विनियोगसत्क्रियाः फलंत्युपायाःपरिबृंहितायतीरुपेत्यसंघर्षमिवार्थसंपदः १५

नराज्ञापदेषुउपादेयवस्तुषु पदंव्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः सम्यगसंकीर्णमव्यस्तंचविभज्य विनियोगएवसत्क्रियाः अनुग्रहस त्काराइतियावत् ताः लंभिताः प्रापिताः स्थानेषुसम्यक्प्रयुक्ताइत्यर्थः उपायविशेषणंवा उपायाः सामादयः संघर्षपरस्परस्पर्द्धांउपेत्येवेत्यु त्प्रेक्षा परिबृंहितायतीः प्रवृत्तोत्तरकालाः स्थिराइत्यर्थः अर्थसंपदोऽनारतमजस्त्रंफलंति प्रसवंतीत्यर्थः १५ ७

अर्थसंपदमेवाह अनेकराजन्येति अयुग्मच्छदस्यसप्तपर्णपुष्पस्यगंधइवगंधोयस्यसोऽयुग्मच्छदगंधिः सप्तम्युपमानेत्यादिनाबहुव्री
हिरुत्तरपदलोपश्च उपमानाच्चेतिसमासांतइकारः नृपाणांउपायनान्युपहारभूतायेदंतिनस्तेषांमदः उपायनमुपग्राह्यमुपहारस्तथो
पदेत्यमरः राज्ञामपत्यानिपुमांसोराजन्याः क्षत्रियाः राजश्वशुराद्यत् इतियत्प्रत्ययः राज्ञोपत्येजातिग्रहणात् रथाश्चाश्वाश्चरथाश्वं

अनेकराजन्यरथाश्वसंकुलंतदीयमास्थाननिकेतनाजिरं
नयत्ययुग्मच्छदगंधिरार्द्रतांभृशंनृपोपायनदंतिनांमदः १६

सेनांगत्वादेकवद्भावः अनेकेषांराजन्यानांरथाश्वेनसंकुलंतदीयमास्थाननिकेतनाजिरंसभामंडपांगणंभृशमार्द्रतांपंकिलतांनयति ए
तेनमहासमृद्धिरस्योक्ता अतएवोदात्तालंकारः तथाचालंकारसूत्रं समृद्धिमद्वस्तुवर्णनमुदात्तइति १६ ७

संप्रतिजनपदक्षेमकरत्वमाह सुखेनेति चिरायतस्मिन्दुर्योधने क्षेमंवितन्वतिक्षेमंकरेसति देवःपर्जन्यएवमातायेषांतेदेवमातृकाः वृ
ष्ट्यंबुजीविनोदेशाः तेनभवंतीत्यदेवमातृकाः नदीमातृकाइत्यर्थः देशोनद्यंबुवृष्ट्यंबुसंपन्नव्रीहिपालितः स्यान्नदीमातृकोदेवमातृक
श्चयथाक्रममित्यमरः एतेनास्यकुल्यादिपूर्तप्रवर्तकत्वमुक्तं कुरूणांनिवासाःकुरवोजनपदविशेषाः कृष्टेनपच्यंतइतिकृष्टपच्याः राजसूये

सुखेनलभ्यादधतःकृषीवलैरकृष्टपच्याइवसस्यसंपदः वितन्वतिक्षेममदेवमातृकाश्चिरायत
स्मिन्कुरवश्चकासति १७

त्यादिनाकर्मकर्तरिक्यब्प्रत्ययांतोनिपातः तद्विपरीताःअकृष्टपच्याइव कृषिर्येषामस्तीति
कृषीवलास्तैःकर्षकैः रजःकृष्यासुतीत्यादिनावलच्प्रत्ययः वलइतिदीर्घः सुखेनाक्लेशेनलभ्याः लब्धुंशक्याःसस्यसंपदोदधतोधारयंतःना
भ्यस्ताच्छतुरितिनुमागमप्रतिषेधः चकासति सर्वोत्कर्षेणवर्ततइत्यर्थः अदभ्यस्तादितिझेरदादेशः जक्षित्यादयःषडित्यभ्यस्तसंज्ञा संपन्नजनप
दत्वान्तरसंतापकरत्वाच्चदुःसाध्योयमितिभावः १७

नन्वेवंजनपदानुवर्तिनस्तस्यकथमर्थलाभइत्याह उदारकीर्तेरिति उदारकीर्तेर्महायशसः उदारोदातृमहतोरित्यमरः दयावतःपरदुःखप्रह
रणेच्छोः अतएवप्रशांतबाधंप्रशमितोपद्रवं क्रियाविशेषणमुदयविशेषणंवा वादांतशांतेत्यादिना शमिधातोर्ण्यंतान्निष्ठांतो निपातः अभि
रक्षयासर्वतस्त्राणेनोदयंबुद्धिंदिशतः संपादयतः वसूपमानस्यकुबेरोपमस्य वसुर्मयूखाग्निधनाधिपेष्विति विश्वः अस्यदुर्योधनस्यगुणैर्द

उदारकीर्तेरुदयंदयावतःप्रशांतबाधंदिशतोऽभिरक्षया स्वयंप्रदुग्धेऽस्यगुणैरुपस्नुतावसूपमानस्य
वसूनिमेदिनी १८ यादाक्षिण्यादिभिरुपस्नुताद्रावितामेदिनीवसूनिधनानि वसुतोयेधनेमणावितिवैजयंती स्वयंप्रदुग्धे अक्लेशे
नदुग्धनइत्यर्थः दुहेःकर्मकर्तरिलिट् नदुहस्नुनमांयक्चिणावितियक्प्रतिषेधः यथाकेनचिद्दिदग्धेनरक्षितावर्धितान्चगौः स्वयमेवप्रदु
ग्धेतद्वदितिभावः अलंकारस्तुविशेषणमात्रसाम्यादप्रस्तुतस्यगम्यत्वेसमासोक्तिरितिसर्वस्वकारः अत्रप्रतीयमानयागवासहप्रकृतायामेदिन्या
भेदेऽभेदलक्षणादिभिरुपस्नुताद्रावितामेदिनी वसूनीत्यतिशयोक्तिवशादपोत्थत्वेनोक्तिरितिसंक्षेपः १८ ७

संप्रतिवीरभटानुकूल्यमाह दर्शितपराक्रमावीराः संभावितपराक्रमाभटाः महौजसाइति महौजसोमहाबलाः अन्यथादुर्बलानाम नुपकारकत्वादितिभावः मानःकुलशीलाद्यभिमानएवधनंयेषांतेमानधनाः अन्यथाकदाचिद्बलदर्पाद्विकुर्वीरन्नितिभावः धनार्चिताः धनैःसंस्कृताः अन्यथादारिद्र्याद्दैन्यंजग्मुरितिभावः संयतिसंगरेलब्धकीर्तयः बहुशः क्षुण्णसंग्रामाइत्यर्थः अन्यथाकदाचिन्मुह्ये

महौजसोमानधनाधनार्चिताधनुर्भृतःसंयतिलब्धकीर्तयः
नसंहतास्तस्यनभिन्नवृत्तयःप्रियाणिवांछंत्यसुभिःसमीहितुं १९

युरितिभावः संहताःमिथःसंगताःस्वार्थनिष्ठानभवंतीतिनसंहताः नञर्थस्यनशब्दस्यसुप्सुपेतिसमासः भिन्नवृत्तयोमिथोविरोधात् स्वामिकार्याकरानभवंतीतिनभिन्नवृत्तयः पूर्ववत्समासः अन्यथास्वामिकार्यहानिःस्यादित्युभयत्रापितात्पर्यं धनुर्भृतःधानुष्काः आयुधमात्रोपलक्षणमेतत् प्राधान्याद्धनुर्ग्रहणं तस्यदुर्योधनस्य असुभिः प्राणैः प्रियाणिसमीहितुंकर्तुंवांछंति आनृण्यार्थंप्राणान्दातुमिच्छंतीत्यर्थः अन्यथादो

षस्मरणादितिभावः अत्रमहौजसइत्यादिपदार्थानांप्राणदानकर्तव्यतांप्रतिविशेषणगत्याहेतुत्वाभिधानात् काव्यलिंगमलंकारः ल
क्षणंतूक्तं तथासाभिप्रायविशेषणत्वात्परिकरालंकारइतिद्वयोस्तिलतंदुलवद्विविक्ततयास्फुरणात्संसृष्टिः १९ स्वराष्ट्रवत्परराष्ट्रवृत्तां
तमपिवेत्तीत्याह महीभृतामिति अशेषितक्रियः समापितकृत्यः आफलोदयकर्मेत्यर्थः सदुर्योधनः सच्चरितैः शुद्धचरितैः अवंचकै

महीभृतांसच्चरितैश्चरैः क्रियाः सवेदनिःशेषमशेषितक्रियः
महोदयैस्तस्यहितानुबंधिभिः प्रतीयतेधातुरिवेहितंफलैः २०

रित्यर्थः चरंतीतिचरास्तैः प्रणिधिभिः पचाद्यच् महीभृतांक्रियाः प्रारंभान्निःशेषंवेदवेत्ति विदोलटोवेतिलटोणलादेशः स्वरहस्यंकश्चिन्नवे
देत्याह महोदयैरिति धातुरिवतस्यदुर्योधनस्यहितमुद्योगोमहोदयैर्महावृद्धिभिः हितमनुबध्नंति अनुरुंधंतीतिहितानुबंधिभिः स्वंतैरि
त्यर्थः फलैः कार्यसिद्धिभिः प्रतीयतेज्ञायतेफलानुमेयास्तस्यप्रारंभाइत्यर्थः २०

संप्रतिमित्रबलमाह नेति तेनराज्ञाक्कचित्कुत्रापिसहज्ययामौर्व्यासज्यं मौर्वीज्यासिंजिनीगुणइत्यमरः तेनसहेतितुल्ययोगइतिबहुव्री
हिः धनुर्नोद्यतंनोर्ध्वीकृतं आननंवाकोपविजिह्मंकोपकुटिलंनकृतं यस्यकोपएवनोदेतिकुतस्तस्ययुद्धप्रसक्तिरितिभावः कथंतर्ह्या
ज्ञांकारयतिराज्ञइत्यत्राह गुणेति गुणेषुदयादाक्षिण्यादिषुअनुरागेणप्रेम्णा माल्यपक्षेसूत्रानुषंगेणेत्यर्थः अथवासौरभ्यगुणलोभेन

नतेनसज्यंक्वचिदुद्यतंधनुःकृतंनवाकोपविजिह्ममाननं
गुणानुरागेणशिरोभिरुह्यतेनराधिपैर्माल्यमिवास्यशासनं २१

नराधिपैरस्यशासनंआज्ञामालेवमाल्यंतदिव चतुर्वर्णादित्वात्स्वार्थेष्यञितिक्षीरस्वामी शिरोभिरुह्यतेधार्यते वचिस्वपियजादीनांकितीति
यकिसंप्रसारणं अत्रोपमास्फुटैव २१ ७ ७ ७

संप्रत्यस्यधार्मिकत्वमाह सइति इद्धशासनः अप्रतिहताज्ञइत्यर्थः सदुर्योधनोनवयौवनेनोद्धतंप्रगल्भं धुरंधरमित्यर्थः दुःखेनशास्तीति
दुःशासनस्तं भाषायांशासियुधीत्यादिनाखलर्थेयुच्प्रत्ययः यौवराज्येयुवराजकर्मणि ब्राह्मणादित्वात्ष्यञ् विधाय नियुज्येत्यर्थः पुरोध
सापुरोहितेनानुमतोनुज्ञातः तस्मिन्याजकेसतीत्यर्थः तदुल्लंघनेदोषस्मरणादिनिभावः निष्ठेतिभूतार्थेक्तः नतुमतिबुद्धीत्यादिनावर्तमाना

सयौवराज्येनवयौवनोद्धतंविधायदुःशासनमिद्धशासनः
मखेष्वखिन्नोनुमतःपुरोधसाधिनोतिहव्येनहिरण्यरेतसं २२

र्थे अन्यथापुरोधसेत्यत्रक्तस्यचवर्तमानइतिषष्ठीस्यात् अखिन्नोऽनलसः मखेषुक्रतुषुहिरण्यंरेतोयस्यतंहिरण्यरेतसमग्निं हव्येनह
विषा आज्यादिहविर्द्रव्येणेत्यर्थः धिनोतिप्रीणयति धिन्वेःप्रीणनार्थाद्धिन्विकृण्व्योरचेत्युप्रत्ययोऽकारश्चांतादेशः २२ ७

सएवंविधश्चेदुद्योगी तर्ह्यस्माभिर्निरुद्योगैर्भाव्यमित्याशंक्योद्योगाशां दर्शयति प्रलीनभूपालमिति सदुर्योधनः प्रलीनभूपालं निःसपत्नमि त्यर्थः स्थिरायति चिरस्थायीत्यर्थः भुवोमंडलं आवारिधिभ्यः आवारिधि आङ्मर्यादाभिविध्योरित्यव्ययीभावः प्रशासदाज्ञापयन्नपि ज क्षित्यादयः षडित्सभ्यस्तसंज्ञा नाभ्यस्तात्छतुरितिनुमागमप्रतिषेधः त्वत्त्वत्तः एष्यतीः आगमिष्यतीः धातूनामनेकार्थत्वादुक्तार्थसिद्धिः

प्रलीनभूपालमपिस्थिरायतिप्रशासदावारिधिमंडलंभुवः
सचिंतयत्येवभियस्त्वदेष्यतीरहोदुरंताबलवद्विरोधिता २३

अथवा आङ्पूर्वः पाठः एत्येधत्यूठ्स्वितिवृद्धिः लटः सद्वेतिसत्प्रत्ययः उगितश्चेतिङीष् आच्छीनद्योर्नुमितिविकल्पान्नुमभावः भियो भयहेतून् विपदइत्यर्थः चिंतयत्यालोचयत्येव सएवाह अहोबलवद्विरोधितादुरंतादुष्टावसाना सार्वभौमस्यापिप्रबलैः सहवैरायमा णत्वमनर्थपर्यवसाय्येवेत्याश्चर्यं सामान्येनविशेषसमर्थनरूपोर्थांतरन्यासः २३ ७

ननुगूढाकारेंगितस्यतस्यभयंत्वयाकथंनिरधारीत्याह कथाप्रसंगेनेति कथाप्रसंगेनगोष्ठीवशेनजनैः अन्यत्रकथाप्रसंगेनविषवैद्ये
न कथाप्रसंगोवार्तायांविषवैद्येपिवर्ततइतिविश्वः एकवचनस्यापिकथाप्रसंगशब्दस्यजात्यभिप्रायेणबहुवचनेनसंबंधाज्जनविशेषणं
यद्वाकथाप्रसंगेइनाः तेचतेजनाश्चैस्तैरेकंपदं उदाहृतादुच्चरितात् तवाभिधानान्नामधेयात्स्मारकाद्धेतोः हेताविति पंचमी आख्याह्वेअभि

कथाप्रसंगेनजनैरुदाहृतादनुस्मृताखंडलसूनुविक्रमः
तवाभिधानाद्व्यथतेनताननःसुदुःसहान्मंत्रपदादिवोरगः २४

धानंचनामधेयंचनामचेत्यमरः अनुस्मृताखंडलसूनुविक्रमःस्मृतार्जुनपराक्रमः अन्यत्रतवाभिधानान्नामैकदेशेनामग्रहणमितिन्याया
त् तार्क्ष्यचतार्क्ष्यतवौतार्क्ष्यवासुकीतयोरभिधानंयस्मिन्पदेतस्मात् सुदुःसहादतिदुःसहान्मंत्रपदान्मंत्रशब्दात्स्मारकाद्धेतोः आखंडलसूनु
रिंद्रानुजः उपेंद्रोविष्णुरितियावत् सूनुःपुत्रेनुजेरवावितिविश्वः तस्यविःपक्षी गरुडइत्यर्थः विःपक्षिपरमात्मनोरित्यमरः तस्यक्रमःपा

दविक्षेपः सोनुस्मृतोयेनसतथोक्तः स्मृतगरुडमहिमाउरगइवनताननः सन् उरगः पन्नगोभोगीजिह्मगः पवनाशनइत्यमरः व्यथतेदुःखा
यते पीडाबाधाव्यथादुःखमित्यमरः अत्युत्कटभयदोषादिविकारादुर्वाराइतिभावः सर्वत्रजयमन्विच्छेत्पुत्रादिच्छेत्पराजयमितिन्यायादर्जुनो
त्कर्षकथनंयुधिष्ठिरस्यभूषणमेवेतिसर्वमवदातं २४ उक्तमर्थंनिगमयति तदिति तत्तस्मात्त्वयिजिह्मंकपटंकर्तुंउद्यते त्वांजिघांसावित्य

तदाशुजिह्मंत्वयिकर्तुमुद्यतेविधीयतांतत्रविधेयमुत्तरं
परप्रणीतानिवचांसिचिन्वतांप्रवृत्तिसाराःखलुमादृशांगिरः २५

र्थः तत्रतस्मिन्दुर्योधनेविधेयंकर्तव्यमुत्तरंप्रतिक्रियारूपमाशुविधीयतां क्रियतां ननुतत्कर्तव्यमपित्वयैवोच्यतामित्यत्राक्षेपआह परेति पर
प्रणीतानिपरोक्तानिवचांसिचिन्वतांगृह्णतांमादृशां वार्ताहारिणामित्यर्थः गिरःप्रवृत्तिसाराः वार्तामात्रसाराः खलु एवार्थे वार्ताप्रवृत्तिर्वृत्तांतइत्य १६

मरः वार्तामात्रवादिनो वयं न तु कर्तव्यार्थोपदेशसमर्थाः अतस्त्वयैव निर्धार्य कार्यमिति भावः सामान्येन निमित्तविशेषसमर्थ
नादर्थान्तरन्यासः २५ इतीति वनसंनिवासिनां पत्यौ वनेचराधिपे इति गिरमीरयित्वा उक्त्वा आत्तसत्क्रिये गृहीतपारितोषिके
गते सति तुष्टिदानमेव चाराणां वेतनं तेहि तल्लोभात् स्वामिकार्येऽतीव त्वरयंतीति नीतिवाक्यामृतात् अथ महीभुजा राज्ञा कृ

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसंनिवासिनां प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेनु
जसंनिधौ वचः २६ निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियंतुमक्षमा

ष्णासदनं द्रौपदीगृहं प्रविश्य अनुजसंनिधौ तद्वनेचरोक्तं वचः आचचक्षे आख्यातं अथवा कृष्णेति पदच्छेदः सदनं प्रविश्यानुज
संनिधौ तद्वचः कृष्णा आचचक्षे आख्याता चक्षिङो दुहादेर्द्विकर्मकत्वादप्रधाने कर्मणि लट् २६ निशम्येति ततः द्रुपदात्मजा द्रौ
पदी द्विषतां सिद्धिं वृद्धिरूपां निशम्य ततो द्विषद्भ्य आगताः ततस्त्याः अव्ययात्त्यबिति त्यप् अपाकृतीः विकारान् विनियंतुं निरो

द्रुं हृदयद्रुहृदति शेषः अक्षमासती नृपस्य युधिष्ठिरस्य मन्युव्यवसाययोः क्रोधोद्योगयोः दीपिनीः संवर्धिनीः गिरो वाक्यान्युदाजहार जगाद २७ भवादृशेष्विति भवादृशा भवद्विधाः पंडिता इत्यर्थः तेषु विषये त्यदादिष्वित्यादिना कञ् आ सर्वनाम्न इत्याकारादेशः प्रमदाजनोदितं स्त्रीजनोक्तं वदेः क्तः वचिस्वपी त्यादिना संप्रसारणं अनुशासनं नियोगवचनमधिक्षेपस्तिरस्कारइ

नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः २७ भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम् तथापि वक्तुं व्यवसाययंति मां निरस्तनारीसमया दुराधयः २८

व भवति अतो न युक्तं वक्तुमित्यर्थः तथापि वक्तुमनुचितेपि निरस्तनारीसमयाः त्याजितशालीनतारूपस्त्रीसदाचाराः समयाः शपथाचारकालसिद्धांतसंविद इत्यमरः दुराधयः सम योढ्लं घनहेतुत्वादुष्टा मनोव्यथाः पुंस्याधिर्मानसीव्यथेत्यमरः मां वक्तुं व्यवसाययंति प्रेरयंति नकिंचिदयुक्तं दुःखिनामितिभावः २८ १७

अथ चतुर्भिः कोपमुद्दीपयन्नाह अखंडमिति आखंडलतुल्यधामभिरिंद्रसमप्रतापैः स्ववंशजैर्भूपतिभिः भरतादि-
भिः चिरमखंडमविच्छिन्नं धृता मही त्वया मदं श्च्योतनीति मदश्च्युत् क्विप् तेन मदस्त्राविणा मतंगजेन स्रगिव आत्महस्तेन स्वकरेण स्वचापल्येनेत्यर्थः अपवर्जिता परिहृता स्वदोषादेवायमनर्थागम इत्यर्थः २९ स्वदोषादेवायमनर्था-

अखंडमाखंडलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः त्वयात्महस्तेन महीमदच्युता मतंगजेन स्रगिवा
पवर्जिता २९ व्रजंति ते मूढधियः पराभवं भवंति मायाविषु ये न मायिनः प्रविश्य हि घ्नंति शठास्तथाविधा नसंवृ
तांगान्निशिता इवेषवः ३०

गम इत्युक्तं स च दोषः कुटिलेषु कौटिल्यमेवेत्याह व्रजंतीति मूढधियो निर्विवेकबुद्धयः ते पराभवं व्रजंति ये मायावि
षु मायावत्सु विषये अस्माये त्यादिना विनिप्रत्ययः मायिनो मायावंतः व्रीह्यादिभ्यश्चादिनि प्रत्ययः न भवंति अत्रैवार्थांत
रं न्यास्यति प्रविश्येति शठाः अपकारिणः धूर्तास्तथाविधान् अकुटिलान् असंवृतांगान् अवर्मितशरीरान् निशिता स्ती

क्ष्णा इषवइव प्रविश्य प्रवेशं कृत्वा घ्नंतिहि आर्जवंहि कुटिलेषु ननीतिरितिभावः ३० नचलक्ष्मी र्यांचस्त्यादय मनर्थागमः
किंतु स्वोपेक्षा दोषमूलत्वादित्याशयेनाह गुणानुरक्तामिति अनुरक्तसाधनः अनुकूलसहायवान् उक्तंच कामंदके–
उद्योगादनिवृत्तस्य स्कसहायस्य धीमतः छायेवानुगता तस्यानित्यं श्रीः सहचारिणीति कुलाभिमानी क्षत्रियवंशाभि
मानी कुलीनत्वाभिमानीच त्वदन्यः त्वत्तोन्यः अन्यारादित्यादिना पंचमी कइव कोवा इवशब्दो वाक्यालंकारे नराधिप

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिवश्रियं ३१

गुणैः संध्यादिभिः सौंदर्यादिभिश्चानुरक्तां सानुरागां कुलजां कुलक्रमादागतां कुलीनांच मनोरमां श्रियमात्मवधूं स्वभा
र्यामिव वधूर्जाया स्नुषा स्त्रीचेत्यमरः परैः शत्रुभिरपहारयेत् स्वयमेवापहारं कारयेदित्यर्थः कलत्रापहारवल्लक्ष्म्यप
हारोपि राज्ञां मानहानिकरत्वादनुपेक्षणीय इतिभावः ३१

अथदशभिः कोपोद्दीपनं करोति भवंतमिति हे नरदेव नरेंद्र एतर्हि इदानीं अस्मिन्नापत्काल इत्यर्थः एतर्हि संप्रतीदानी मधुना सांप्रतं तथेत्यमरः इदमोर्हिलि तिर्हि त्द्प्रत्ययः एतेतौरथो रित्येतादेशः आपदमेवाह मनस्विगर्हिते शत्रुजनजु गुप्सिते वर्त्मनि मार्गे विवर्तमानं शत्रुणा कृतां दुर्दशामनु भवंतमित्यर्थः भवंतमुदीरितः उद्दीपितो मन्युः क्रोधः शुष्कं नी

भवंतमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ३२

रसं शुषेः क इति निष्ठातकारस्य ककारः शमी चासौ तरुश्चेति विशेषणसमासः तं शमीतरुं शमीग्रहणं शीघ्रज्वल न स्वभावात्कृतं उच्छिख उद्भूतज्वालः घृणिज्वाले अपि शिखे इत्यमरः वह्निरिव कथं न ज्वलयति ज्वलयितुमुचितमित्य र्थः मितां ह्रस्व इति ह्रस्वः ३२

नन्वंतःशत्रुत्वादयं क्रोधस्त्याज्य एवेत्याशंक्याह अवंध्यकोपस्येति अवंध्यकोपस्य अत एव आपदां विहंतुः निग्रहानुग्रह
समर्थस्येत्यर्थः पुंस इति शेषः देहिनो जंतवः स्वयमेव वश्या वशंगता भवंति वशंगता इति यत्प्रत्ययः अतस्त्वया कोपिना
भवितव्यमित्यर्थः व्यतिरेके त्वनिष्टमाचष्टे अमर्षशून्येन निष्कोपेन जंतुना कन्यया शोक इति वदेत्तावेति तृतीया हृ
दयस्य कर्म हार्दं स्नेहः प्रेमा नाम प्रियता हार्दं प्रेम स्नेहोऽथ दोहदमित्यमरः युवादित्वादण्प्रत्ययः हृदयस्य हृल्लेखयदण्

अवंध्यकोपस्य विहंतुरापदां भवंति वश्याः स्वयमेव देहिनः अमर्षशून्येन जनस्य जंतुना न जातहार्देन न च विद्विषादरः
३३

त्वासेचितिहृदादेशः जातहार्देन जातस्नेहेन जनस्य आदरो न विद्विषा विद्विषता च सता आदरो न अमर्षहीनस्य राग
द्वेषावकिंचित्करत्वादगण्यावित्यर्थः अथवा विद्विषा सता दरो भयं न दरोऽस्त्रियां भये श्वभ्र इत्यमरः एकस्मिन्नेव प्र
योगे संधिवशात् द्विधा पदच्छेदः पुंवाक्येषु न दोषः अतः स्थाने कोपः कार्यः त्याज्यस्त्वस्थाने कोप इति भावः ३३

परिभ्रमन्निति लोहितचंदनोचितः उचितलोहितचंदनः वाहिताग्न्यादिष्विति साधुः अभ्यस्तरक्तचंदन इत्यर्थः अ
भ्यस्तेप्युचितं न्याय्य इति यादवः महारथो रथचारी उभयत्रापि प्रागिति शेषः अद्य तु रेणुरूषितो धूलिधूसरितः पादा-
भ्यामतति गच्छतीति पदातिः पादचारी अज्यतिभ्यां चेत्यनुवृत्त्या पादे चेत्यौणादिक इण् प्रत्ययः पादस्य पदाज्याति गोपहतेष्विति

परिभ्रमन् लोहितचंदनोचितः पदातिरंतर्गिरि रेणुरूषितः
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ३४

ति पदादेशः गिरिषु अंतः अंतर्गिरि विभक्त्यर्थेऽव्ययीभावः गिरेश्च सेनकस्येति विकल्पात्समासांताभावः परिभ्रम
न्नयं वृकोदरो भीमः सत्यधनस्येति सोल्लुंठनं वचनं अद्यापि त्वया सत्यमेव रक्ष्यते न तु भ्रातर इति भावः तवेति शेषः मा
नसं नो दुनोति कच्चित् न परितापयति किं कच्चित्काम प्रवेदन इत्यमरः स्वाभिप्रायाविष्करणं कामप्रवेदनम् ३४

विजित्येति वासवउपमायस्य सः वासवोपमः इंद्रतुल्यो योधनंजयः उत्तरान्कुरून् मेरोरुत्तरानमानुषान् देशविशेषा
न्विजित्य प्राज्यं प्रभूतं प्रभूतंप्रचुरंप्राज्यमदभ्रंबकुलंबह्वित्यमरः कुप्यादन्यदकुप्यं हेमरूप्यात्मकं स्यात्कोशश्च
हिरण्यंचहेमरौप्येकृताकृते ताभ्यांयदन्यत्तत्कुप्यमित्यमरः वस्केधनमयछत्दत्तवान् पाघ्रेत्यादिना दाणोयच्छादे

विजित्ययःप्राज्यमयच्छदुत्तरान्कुरूनकुप्यंवसुवासवोपमः
सवल्कवासांसितवाधुनाहरन्करोतिमन्युंनकथंधनंजयः ३५

शः सधनंजयतीतिधनंजयःअर्जुनः संज्ञायांभृतृवृजीत्यादिनाखच्प्रत्ययः अरुर्द्विषदित्यादिनामुमागमः अधु
नास्मिन्काले अधुनेतिनिपातनात्साधुः वल्कवासांसिआहरन्कथंतवमन्युंक्रोधंदुःखंवानकरोति ३५

वनांतशय्येति वनस्य अंतःस्वरूपं अंतःप्रांतेंऽतिकेनाशेस्वरूपेच्च मनोहरइतिविश्वः वनांतः वनभूमिरेवशय्यातया कठिनीकृताकृतीकठिनी कृतदेहो आकारोदेहआकृतिरितिवैजयंती विष्वक्समंतात् समंततस्तुपरितःसर्वतोविष्वगित्यपीत्यमरः कचाचितौकचव्याप्तौ विशीर्णके शाविस्यर्थः अतएवागजौ गिरिसंभवौगजाविव स्थितावितिश्लेषः एतौयमौयुग्मजातौ माद्रीपुत्रावित्यर्थः यमोदंडधरेध्वांक्षेसंयमेयमजे

वनांतशय्याकठिनीकृताकृतीकचाचितौविष्वगिवागजौगजौ
कथंत्वमेतौधृतिसंयमौयमौविलोकयन्नुत्सहसेनबाधितुं ३६

पिच्चेतिविश्वः विलोकयंस्त्वंकथंधृतिसंयमौसंतोषनियमौ धृतिर्योगांतरेधैर्येधारणाध्वरतुष्टिष्वितिविश्वः बाधितुंनोत्सहसेनप्रवर्तसे शकधृषेत्यादिनातुमुन् अहोतेमहद्धैर्यमितिभावः ३६ ५ ५ ५

अथराज्ञोदुर्दशांदर्शयितुमुपोद्घातमाह प्रकृतार्थवर्णयितुमर्थांतरवर्णनमुपोद्घातः इमामिति इमांवर्तमानांतवेमांतावकींत्वदीयां त स्येदमित्यण्प्रत्ययः तवकममकावेकवचनइतितवकादेशः धियंत्वदापद्विषयांचित्तवृत्तिमहंनवेद कीदृशींवानवेद्मि परबुद्धेरप्रत्यक्ष त्वादितिभावः विदोलटोवेतिलटोणलादेशः नचात्मदृष्टांतेनापन्नदुःखित्वमनुमातुंशक्यते धीरादिष्वनैकांतिकत्वादित्याशयेनाह चित्त

इमामहंवेदनतावकींधियंविचित्ररूपाःखलुचित्तवृत्तयः
विचिंतयंत्याभवदापदंपरांरुजंतिचेतःप्रसभंसमाधयः ३७

वृत्तयोविचित्ररूपाः धीराधीराद्यनेकप्रकाराःखलु किंतुपरामुत्कृष्टांभवदापदंविचिंतयंत्याः भावयंत्याः ममचेतश्चित्तं आधयोमनोव्यथाः उ पसर्गेघोःकिरितिकिप्रत्ययः प्रसभंप्रसह्यरुजंति रुजोभंगइतिधातोर्लट् पश्यतामपिदुःसहादुःखजननीत्वद्विपत्तिरनुभवितारंत्वांकथंनवि करोतीतिमहच्चित्रमित्यर्थः चेतइतिरुजार्थानांभाववचनानामज्वरइतिषष्ठीनभवतितत्रशेषाधिकाराच्छेषत्वस्यविवक्षितत्वादिति ३७

तदापद्दमेव श्लोकत्रयेणाह पुराधिरूढ इति यस्त्वं महाधनं बहुमूल्यं श्रेष्ठमित्यर्थः महाधनं बहुमूल्यमितिविश्वः शयनं शय्यामधिरूढः स न्स्तुतयोगीतयश्चता एव मंगलानितैः करणभूतैः पुरा विबोध्यसे वैतालिकैरितिशेषः पूर्वं विबोधित इत्यर्थः पुरिलुङ् चास्म इति भूतार्थे लट् स त्वमदभ्रदर्भं बहुकुशां अस्त्री कुशं कुथो दर्भः अदभ्रं बहुलं बहु इत्यमरः स्थलीमकृत्रिमभूमिं जानपदेत्यादिना ऽकृत्रिमार्थे ङीप् एतेन

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमंगलैः
अदभ्रदर्भामधिशय्य सः स्थलीं जहासि निद्रामशिवैः शिवारुतैः २८

दुःसहस्पर्शत्वमुक्तं अधिशीङ्स्थासांकर्मेतिकर्मत्वं अधिशय्य शयित्वा अयङ् यि क्ङितीत्ययङादेशः अशिवैरमंगलैः शिवारुतैः क्रोष्टुवाशितैः शिवा हरीतकी क्रोष्ट्री शमीनद्यामलक्युमेतिवैजयंती निद्रां जहासि अद्येतिशेषः २८

पुरोपनीतमिति हेनृपयदेतत्पुरोवर्त्तिवपुः पुराद्विजातिशेषेण द्विजभुक्तावशिष्टेन अंधसा अन्नेन भिस्सास्त्रीभक्तमंधोन्नमित्यमरः रमणी यस्य भावः रामणीयकंमनोहरत्वमुपनीतं प्रापितं नयतेर्द्विकर्मकत्वादप्रधानेकर्मणिक्तः प्रधानकर्मण्याख्येयेलादीनाद्कुर्द्विकर्मणामितिव

पुरोपनीतंनृपरामणीयकंद्विजातिशेषेणयदेतदंधसा
तदद्यतेवन्यफलाशिनःपरंपरैतिकार्श्यंयशसासमंवपुः ३९

चनात् अद्यवन्यफलाशिनस्तेतवतद्वपुर्यशसासमंपरमतिमात्रंकार्श्यंपरैतिप्राप्नोति उभयमपिक्षीयतइत्यर्थः अत्रसहोक्तिरलंकारः तदुक्तंकाव्यप्रकाशे सासहोक्तिःसहार्थस्यबलादेकार्थवाचकमिति ३९ ५ ५ ५

अनारतमिति अनारतमजस्रंमणिपीठशायिनोमणिमयपीठशायिनौयौचरणौराजशिरःस्रजांनम्रभूपालमौलिस्रजांरजःपरागोऽरंजयत् तेतवतौचरणौमृगैर्द्विजैश्चतपस्विभिरालूनशिखेषु छिन्नाग्रेषुबर्हिषांकुशानां बर्हिःकुशाकूताशयोरितिविश्वः वनेषुनिषीदतस्तिष्ठतः ४० ननुसर्वप्राणिसाधारण्यामापदिकापरिवेदनेत्यत्राह द्विषन्निमित्तेति यद्यतःकारणादियंदशावस्था दशावर्त्तावस्थायामिति

अनारतंयौमणिपीठशायिनावरंजयद्राजशिरःस्रजांरजः निषीदतस्तौचरणौवनेषुतेमृगद्विजालूनशिखेषुबर्हिषां ४० द्विषन्निमित्तायदियंदशाततःसमूलमुन्मूलयतीवमेमनः परैरपर्यासितवीर्यसंपदांपराभवोप्युत्सवएवमानिनां ४१

विश्वः द्विषंतोनिमित्तंयस्याःसाद्विषोऽमित्रइतिशतृप्रत्ययः अप्रियनिमित्तेत्यर्थः अतःमेमनःसमूलंसाशयमुन्मूलयतीवउत्पाटयतीव दैविकीत्वापन्नदुःखायेत्याह परैःशत्रुभिः अपर्यासिताअपर्यावर्तितावीर्यसंपदोयेषांतेषांमानिनांपराभवोविपदप्युत्सवएवभवति वैधर्म्येणार्थांतरन्यासः मानहानिर्दुःसहानत्वापदितिभावः ४१

विहायेति हे नृप शांतिं विहाय तत्प्रसिद्धं धाम तेजो विद्विषां वधाय पुनः संधेहि अंगीकुर्वित्यर्थः प्रसीद अस्मानिति शेषः प्रार्थनायां लोट् शमेन कार्यसिद्धौ किं क्रोधेनेत्यत्राह व्रजंतीति निःस्पृहाः मुनयः शत्रून् अंतः शत्रून् अवधूय निर्जित्य शमेन क्रोधवर्जनेन सिद्धिं व्रजंति भूभृतस्तु न केवल्यकार्यवद्राजकार्यं न शांतिसाध्यमित्यर्थः ४२ पुरःसरा इति किं च धामवतां तेजस्विनां परनिकारासहिष्णूनामित्यर्थः पु-

विहाय शांतिं नृप धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषां व्रजंति शत्रूनवधूय निः
स्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ४२ पुरःसरा धामवतां यशोधनाः सुदुःसहं प्राप्य नि
कारमीदृशं भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हंत हता मनस्विता ४३

रः सरंतीति ते पुरःसराः अग्रेसराः पुरोग्रतोग्रेषु सर्तेरिति टप्रत्ययः यशोधनाः भवादृशाः सुदुःसहमतिदुःसहं ईदृशमुक्तप्रकारं निकारं पराभवं प्राप्य रतिं संतोषमधिकुर्वते स्वीकुर्वते चेत् हंत इति खेदे मनस्विता अभिमानिता निराश्रया सती हता तेजस्विनैकशरणत्वान्मनस्वितायाः इत्य

र्थः अतःपराक्रमितव्यमितिभावः यद्यप्यत्रप्रसहनस्यासंगतेरधिपूर्वात्करोतेः अधेःप्रसहनइत्यात्मनेपदंनभवति प्रसहनेपरिभवइतिका
शिकातथाप्यस्याः कर्त्रभिप्रायविवक्षायामेवप्रयोजकत्वात्कर्त्रभिप्रायेस्वरितञितइत्यादिनैवात्मनेपदंप्रसिद्धं ४३ अथेति अथपक्षां
तरेनिरस्तविक्रमः सन्चिराय चिरकालेनापि क्षमां क्षांतिमेव क्षितिक्षांत्योः क्षमेत्यमरः सुखस्यसाधनंपर्येषि अवगछसि तर्हिल-

अथक्षमामेवनिरस्तविक्रमश्चिरायपर्येषिसुखस्यसाधनं
विहायलक्ष्मीपतिलक्ष्मकार्मुकंजटाधरःसन्जुहुधीहपावकं ४४

क्ष्मीपतिलक्ष्मराजचिह्नंकार्मुकंविहाय धरतीतिधरः पचाद्यच् जटानांधरः जटाधरःसन् इहवनेपावकंजुहुधि पावकेहोमंकुर्वित्यर्थः अ
धिकरणेकर्मत्वोपचारः विरक्तस्यकिंधनुषेत्यर्थः हुझल्भ्योहेर्धिः ४४ ७ ९ ९

अथसमयोल्लंघनाद्बिभेषिन्वेत्तदपिनकिंचिदित्याह नेति परेषुशत्रुषुनिकृतिः शाठ्यंपरंप्रधानंयेषुतेषुतथोक्तेषुअपकारतत्परेषुसत्सु भूरि धाम्नोमहौजसः प्रतीकारक्षमस्येत्यर्थः तेतवसमयस्त्रयोदशवत्सरान्वनेवत्स्यामीत्येवंरूपासंवित् समयाः शपथाचारकालसिद्धांतसंविद इत्यमरः तस्यपरिरक्षणंप्रतीक्षणंनक्षमंनयुक्तं युक्तेक्षमंशक्तहितेत्रिष्वित्यमरः हियस्माद्विजयार्थिनोविजिगीषवः क्षितीशाः अरिषुरि

नसमयपरिरक्षणंक्षमंतेनिकृतिपरेषुपरेषुभूरिधाम्नः
अरिषुहिविजयार्थिनःक्षितीशाविदधतिसोपधिसंधिदूषणानि ४५

पुषुविषयेसोपधिसकपटंयथाभवतितथा कपटोस्त्रीव्याजदंभोपधयश्छद्मकैतवइत्यमरः संधिदूषणानिविदधतिकुर्वते केनचिद्व्याजेन दोषमापाद्यसंधिंदूषयंतिविघटयंतीत्यर्थः शक्तस्यहिजिगीषोःसर्वथाकार्यसाधनंप्रधानंअन्यत्समयरक्षणादिकमशक्तस्येतिभावः अर्थांतरन्यासोऽलंकारः पुष्पिताग्रावृत्तं लक्षणं अयुजिनयुगरेफतोयकारोयुजिचनजौजरगाश्चपुष्पिताग्रेति ४५ ६९

[OrderDescription]
,CREATED=21.05.20 11:14
,TRANSFERRED=2020/05/21 at 11:21:05
,PAGES=49
,TYPE=STD
,NAME=S0003021
,Book Name=M-3004-KIRATAJUNIKEY KAVY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,